गुणीभूतव्यङ्ग्यः, पुं, ( गुणीभूतमप्रधानीभूतं व्यङ्ग्यं व्यञ्जना शक्तिर्यत्र । ) काव्यविशेषः । यथा,—
"अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ॥*
तस्याष्टौ भेदाः यथा ।
"अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदा मताः ॥*॥
अगूढं यथा ।
स्फुटतया वाच्यायमानमिति अपराङ्गम् । यथा अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्य अङ्गं रसादि अनुरणनरूपं वा ॥ * ॥
वाच्यसिद्ध्यङ्गं यथा ।
आपाततः प्रतीतस्य वाच्यार्थस्य प्रतिसन्धीयमानानुपपत्तिनिरासकं व्यङ्ग्यम् ॥ * ॥
अस्फुटं यथा ।
विदग्धैरपि क्लेशगम्यं सन्दिग्धप्राधान्यं यथा प्राधान्यमत्र रसादिव्यञ्जकत्वेन तथा च प्रतीतस्य रसादेर्व्यञ्जकं किं वाच्यं किंवा व्यङ्ग्यमितीत्तरकालिकसन्देहविषयत्वं तत्त्वम् ॥ * ॥
तुल्यप्राधान्यं यथा ।
अत्रापि रसादिव्यञ्जकत्वेनैव प्राधान्यं व्यङ्ग्यस्य निश्चितत्वेन तेन तेन वाच्येन तुल्यार्थो बोध्यः ॥*
काक्वाक्षिप्तं यथा ।
आक्षिप्तमत्र प्रागेव पदार्थविधया उपस्थानम् ॥*
असुन्दरं यथा ।
"रसादिव्यञ्जने वाच्यसुखनिरीक्षकं व्यङ्ग्यम् ।"
इति काव्यप्रकाशः ॥
(इत्यत्र साहित्यदर्पणकारेण काव्यभेदमाश्रित्य यदुक्तं तद्यथा । ४ । १ ।
"काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यञ्चेति द्विधा मतम् ।
वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ॥"
तत्रैव च । ४ । १६ ।
"अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये ।
"अपरं काव्यम् । अनुत्तमत्वं न्यूनतया साम्येन च सम्भवति ॥" ततस्तत्र रसादितराङ्गं काक्वाक्षिप्तञ्चेत्याद्यष्टौ भेदानुक्त्वा इतरस्य रसादेरङ्गं रसादिव्यङ्ग्यं यथेत्यभिधाय क्रमश इतराङ्गादेरुदाहरणानि प्रदर्शितानि । यथा,—
"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥
अत्र शृङ्गारः करुणस्याङ्गम् ।
"मानोन्नतां प्रणयिनीमनुनेतुकाम-
स्त्वत्सैन्यसागररवोद्गतकर्णतापः ।
हा ! हा ! कथं नु भवतो रिपुराजधानी-
प्रासादसन्ततिषु तिष्ठति कामिलोकः ॥
अत्रौत्सुक्यत्राससन्धिसंस्कृतस्य करुणस्य राजविषयरतावङ्गभावः ।
जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृता लङ्काभर्त्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥"
अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्त्यैव रामत्वमवगम्यते । वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्वता तद्गोपनमपाकृतम् । तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम् । काक्वाक्षिप्तं यथा,—
मथ्नामि कौरवशतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥
अत्र 'मथ्नाम्येवेत्यादि' व्यङ्ग्यं वाच्यस्य निषेधस्य सह भावेनैव स्थितम् ।
दीपयन् रोदसीरन्ध्रमेष ज्वलति सर्व्वतः ।
प्रतापस्तव राजेन्द्र ! वैरिवंशदवानलः ॥
अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्यः । प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम् । 'हरस्तु किञ्चित् परिवृत्तधैर्य्य इत्यादौ' विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः ।
ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्म्मनायते ॥
अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।
सन्धौ सर्व्वस्वहरणं विग्रहे प्राणनिग्रहः ।
अल्लावदीननृपतौ न सन्धिर्न च विग्रहः ॥
अत्र अल्लावदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपायः व्यङ्ग्यं व्युत्पन्नानामपि झटित्यस्फुटम् ।
अनेन लोकगुरुणा सतां धर्म्मोपदेशिना ।
अहं व्रतवती स्वैरमुक्तेन किमतः परम् ॥
अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्य्यक् योषिति बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढम् ।
वाणीरकुडुङ्गुड्डीणसउणिकोलाहलं
सुणन्तीए ।
घरकम्मवावडाए बहूए सीअन्ति अङ्गाइं ॥"
अत्र दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्ट इति व्यङ्ग्यात् 'सीदन्त्यङ्गानि' इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरं किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव । काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् । तदुक्तं ध्वनिकृता ।
अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः ॥
यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यासः । यथा,—
दृष्ट्या केशवगोपरागहृतया किञ्चिन्न दृष्टं मया
तेनात्र स्खलितास्मि नाथ ! पतितां किं नाम
नालम्बसे ?
एकस्त्वं विषमेषु खिन्नमनसां सर्व्वावलानां गतिर्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम् ॥"
अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां 'सलेशमिति' पदेन स्फुटतयावभासः । सलेशमिति पदस्य परित्यागे ध्वनिरेव । किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः तत्र प्रधानकृत एव काव्यव्यवहारः । तदुक्तं तेनैव ।
प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्य्यालोचनया पुनरिति ॥
यत्र च ।
यत्रोन्मदानां प्रमदाजनाना-
मभ्रंलिहः शोणमणीमयूखैः ।
सन्ध्याभ्रमं प्राप्नुवता मकाण्डे-
ऽप्यनङ्गनेपथ्यविधिं व्यधत्त ॥
इत्यादौ रसादीनां नगरीवृत्तादि वस्तुमात्रेऽङ्गत्वम् । तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः । तदुक्तमस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डिदासपादैः । काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशस्तस्यास्वादमात्रायत्तत्वादिति ॥")

गुणेश्वरः, पुं (गुणैर्हेतुभिरीश्वरः श्रेष्ठः पूज्य इत्यर्थः । विविधगुणशालिद्रव्यजातोत्पादकतयास्य तथात्वम् ।) चित्रकूटपर्व्वतः । इति शब्दरत्नावली ॥ गुणपतौ त्रि ॥ (गुणानां नानाविधपुरुषोपयोगिगुणानां ईश्वरः प्रभुः स्वामी वा शान्तदान्तादि गुणशाली पुरुष इत्यर्थः। गुणानां सत्त्वरजस्तमसां त्रयाणां मायागुणानामिति यावत् ईश्वरः नियन्ता । परमेश्वरः ॥ )

गुणोत्कर्षः, पुं, ( गुणानां उत्कर्षः उत्कर्षेण प्राधान्यमित्यर्थः ।) गुणप्राधान्यम् । ( यथा, गोः रामायणे । १ । २५ । १६ ।
"स्वभावजैर्गुणैर्दिव्यैः कामजैर्बहुलैर्वृतः ।
भूयस्तव गुणोत्कर्षमेते विद्ये करिष्यतः ॥")
अतिशयः । तत्पर्य्यायः । परभागः २ । इति हेमचन्द्रः । ६ । १३ ॥

गुणोत्कीर्त्तनं, क्ली, ( गुणानां उत्कीर्त्तनं कथनम् ।) यद्वा गुणैर्गुणसूचकवाक्यैरुत्कीर्त्तनम् । गुणकथनम् । विरहकालीनकान्ताविषयकप्रशंसाप्रतिपादनम् । इति रसमञ्जरी ॥ कान्तापदमत्रोपलक्षणम् ॥

गुण्ठितः, त्रि, (गुठि वेष्टने + कर्म्मणि क्तः ।) गुण्डितः । इत्यमरटीकायां रमानाथः ॥ आवृतः । रूषितः । धूल्यादिभिर्धूसरित इत्यर्थः । यथा, गोः रामायणे । ६ । ८२ । ८ ।
"तन्न युद्धेन मे कार्य्यं न प्राणैर्नापि सीतया ।
लक्ष्मणं निहतं दृष्ट्वा भ्रातरं पांशुगुण्ठितम् ॥")

गुण्डः, पुं, ( गुडि वेष्टने + अच् । ) तृणभेदः । यस्य कन्दः कशेरु । तत्पर्य्यायः । काण्डगुण्डः २ दीर्घकाण्डः ३ त्रिकोणकः ४ छत्रगुच्छः ५ असिपत्रः ६ नीलपत्रः ७ त्रिधारकः ८ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कफपित्तातिसारदाहरक्तनाशित्वम् । अस्य मध्ये स्थूलतरोऽधिकगुणः । इति राजनिर्घण्टः ॥